CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

वे ~~४~~ २५
ग्रं स ~~८५~~ १४

श्रीआलवंदार स्तोत्रम्



८६२
८६३ - २

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

१
स्ता॰ २

श्रीमते रामानुजाय नमः ॥ स्वादयन्निह सर्वेषां त्रयन्तार्थं सुदुर्ग्रहम् स्तोत्रयामास योगींद्रस्तं व
देयामुनाह्वयम् ॥ १ ॥ नमो नमो यामुनाय यामुनाय नमो नमः ॥ नमो नमो यामुनाय यामुनाय
यामुनाय नमो नमः ॥ २ ॥ नमो यामुनपादाब्जरेणुभिर्पावितात्मने ॥ विदिताखिलविद्यायवेद २ २
विदितात्मने ॥ ३ ॥ नमोऽचिंत्याद्भुताक्लिष्टज्ञानवैराग्यराशये नाथाय मुनयेऽगाधभगवद्भ
क्तिसिंधवे ४ तस्मै नमो मधुजिदंघ्रिसरोजतत्वज्ञानानुरागमहिमातिशयान्तसीम्ने ना
थाय नाथमुनयेऽत्र परत्र चापि नित्यं यदीयचरणौ शरणं मदीयं ५ भूयो नमोऽपरिमिता
च्युतभक्तितत्वज्ञानामृताब्धिपरिवाहशुभैर्वचोभिः लोकेऽवतीर्णपरमार्थसमग्रभक्ति
योगाय नाथमुनये यमिनां वराय ६ तत्वेन यश्चिदचिदीश्वरतत्स्वभावभोगापवर्गतदु
पायगतीरुदारः संदर्शयन्निरमिमीत पुराणरत्नं तस्मै नमो मुनिवराय पराशराय ७ माता
पिता युवतयस्तनया विभूतिः सर्वं यदेव नियमेन मदन्वयानां आद्यस्य नः कुलपतेर्व

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

कृत्वाभिरामंश्रीमत्तदंघ्रियुगलंप्रणमामिमूर्ध्ना ८ यन्मूर्द्धिमेश्रुतिशिरःसुचभातियस्मिन्नस्म
न्मनोरथपथःसकलःसमेति: स्तोष्यामिनःकुलधनंकुलदैवतंतत्पादारविंदमरविंदविलोचन
स्य ९ तत्वेनयस्यमहिमार्णवशीकराणुःशक्योनमातुमपिसर्वपितामहाद्यैः कर्तुंतदी
यमहिमस्तुतिमुद्यतायमह्यंनमोस्तुकवयेनिरपत्रपाय १० यद्वाश्रमावधियथामतिवाप्य
शक्तःस्तौत्येवमेवखलुतेपिसदास्तुवंतः वेदाश्चतुर्मुखमुखाश्चमहार्णवांतः कोमज्ज
तोरणुकुलाचलयोर्विशेषः ११ किंचैषशक्त्यतिशयेननतेनुकंप्यः स्तोतापितुस्तुतिकृ
तेनपरिश्रमेण तत्रश्रमस्तुसुलभोममममंदबुद्धेरित्युद्यमोयमुचितोममचाब्जनेत्रः १२ ॥
नावेक्षसेयदिततोभुवनान्यमूनिनालंप्रभोभवितुमेवकुतःप्रवृत्तिः एवंनिसर्गसुहृदित्वयि
सर्वजंतोः स्वामिन्नचित्रमिदमाश्रितवत्सलत्वम् १३ स्वाभाविकानवधिकातिशयेशितृ
त्वंनारायणत्वयिनमृष्यतिवैदिकःकः ब्रह्माशिवःशतमखःपरमस्वराडित्येतेपियस्यमहि

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

मार्णवविप्रुषस्ते १४ कः श्रीः श्रियः सत्वसमाश्रयः कः कः पुंडरीकनयनपुरुषोत्तमः कः कस्या
युतायुतशतैककलांशकांशे विश्वं विचित्रचिदचित्प्रविभागवृत्तम् १५ वेदापहारगुरुपात
२ कदैत्यपीडाद्यापद्विमोचनमहिष्ठफलप्रदानैः कोन्यः प्रजापशुपती परिपाति कस्य पादो
दकेन स शिवः स्वशिरोधृतेन १६ कस्योदरे हरविरंचिमुखः प्रपंचः को रक्षतीममजनिष्ट च
कस्य नाभेः क्रांत्वा निगीर्य पुनरुद्गिरति त्वदन्यः कः केन चैष परवानिति शक्यशंकः १७
त्वां शीलरूपचरितैः परमप्रकृष्टसत्वेन सात्विकतया प्रबलैश्च शास्त्रैः प्रख्यातदैवपरमार्थवि
दां मतैश्च नैवासुरप्रकृतयः प्रभवंति बोद्धुम् १८ उल्लंघितत्रिविधसीमसमातिशायिसंभाव
नं तव परिव्रढिमस्वभावम् मायाबलेन भवतापि निगुह्यमानं पश्यंति केचि(द)निशं त्वदन
न्यभावाः १९ यदंडमंडांतरगोचरं च यद्दशोत्तराण्यावरणानि यानि च गुणाः प्रधानं पुरु
षः परं पदं परात्परं ब्रह्म च ते विभूतयः कृती कृतज्ञः त्वमसि स्वभावतः समस्तकल्याणगु २
वशी वदान्यो गुणवान् ऋजुः शुचिर्मृदुर्दयालुर्मधुरः स्थिरः समः

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

णामृतोदधिः २१ उपर्युपर्यब्जभुवोपिपूरुषान्प्रकल्प्यतेयेशतमित्यनुक्रमात् गिरस्त्व
देकैकगुणावधीप्सयासदास्थितानोद्यमतोतिशेरते २२ त्वदाश्रितानांजगदुद्भवस्थि
तिप्रणाशसंसारविमोचनादयः भवंतिलीलाविधयश्चवैदिकास्त्वदीयगंभीरमनोनुसा
रिणः २३ नमोनमोवाङ्मनसातिभूमयेनमोनमोवाङ्मनसैकभूमये नमोनमोनंतमहा
विभूतयेनमोनमोनंतदयैकसिंधवे २४ नधर्मनिष्ठोस्मिनचात्मवेदीनभक्तिमांस्त्वच्चर
णारविंदे अकिंचनोनन्यगतिःशरण्यत्वत्पादमूलंशरणंप्रपद्ये २५ ननिंदितंकर्मतद
स्तिलोकेसहस्रशोयन्नमयाव्यधायि सोहंविपाकावसरेमुकुंद क्रंदामिसंप्रत्यगतिस्त
वाग्रे २६ निमज्जतोनंतभवार्णवांतश्चिरायमेकूलमिवासिलब्धः त्वयापिलब्धंभगव
न्निदानीमनुत्तमंपात्रमिदंदयायाः २७ अभूतपूर्वंममभाविकिंवासर्वंसहेमेसहजंहि
दुःखं किंतुत्वदग्रेशरणागतानांपराभवोनाथनतेनुरूपः २८ निरासकस्यापिनतावद
दुत्सहेमहेशहातुंतवपादपंकजम् रुषानिरस्तोपिशिशुःस्तनंधयोनजातुमातुश्चरणौजिहासति २९

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

तवामृतस्यंदिनिपादपंकजेनिवेशितात्माकथमन्यदिछति स्थितेरविंदेमकरंदनिर्भरेमधूव्रतोनेक्षु
रकंहिवीक्षते ३० त्वदंघ्रिमुद्दिश्यकदापिकेनचिद्यथातथावापिसकृत्कृतोंजलिः तदैवमुष्णा
२ त्यशुभान्यशेषतःशुभानिपुष्णातिनजातुहीयते ३१ उदीर्णसंसारदवाशुशुक्षणिं क्षणेननि
र्वाप्यपरांच परांचनिर्वृतिं प्रयछतित्वच्चरणारुणांबुजद्वयानुरागामृतसिंधुशीकरः ३२ वि
लासविक्रांतपरावरालयंनमस्यदार्तिक्षपणेकृतक्षणम् धनंमदीयंतवपादपंकजंकदानु
साक्षात्करवाणिचक्षुषा ३३ कदापुनःशंखरथांगकल्पकध्वजारविंदांकुशवज्रलांछनम्
त्रिविक्रमत्वच्चरणांबुजद्वयंमदीयमूर्द्धानमलंकरिष्यति ३४ विराजमानोज्वलपीतवाससंस्मि
तातसीसूनसमामलछविं निमग्ननाभिंतनुमध्यमुन्नतंविशालवक्षस्थलशोभिलक्षणम्
चकासितंज्याकिणकर्कशैःशुभैश्चतुर्भिराजानुविलंबिभिर्भुजैः प्रियावतंसोत्पलकर्णभूषण
श्लथालकाबंधविमर्दशंसिभिः ३६ उदग्रपीनांसविलंबिकुंडलालकावलीबंधुरकंबुकंधरम्
मुखश्रियान्यकृतपूर्णनिर्मलामृतांशुबिंबांबुरुहोज्वलश्रियं ३७ प्रबुद्धमुग्धांबुजचारुलोच २

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

नंसविभ्रमभ्रूलतमुज्वलाधरम् शुचिस्मितंकोमलगंडमुन्नसंललाटपर्यंतविलंबितालकम् ३८ ॥
स्फुरत्किरीटांगदहारकंठिकामणींद्रकांचीगुणनूपुरादिभिः रथांगशंखासिगदाधनुर्वरैः लस
त्तुलस्यावनमालयोज्वलं ३९ चकर्थयस्याभवनंभुजांतरंतवप्रियंधामयदीयजन्मभूः ज
गत्समस्तंयदपांगसंश्रयंयदर्थमंभोधिरमंथ्यबंधिच ४० सवैश्वरूपेणसदानुभूतयाप्यपूर्व
वद्विस्मयमादधानयागुणेनरूपेणविलासचेष्टितैःसदातवैवोचितयातवश्रिया ४१ तयास
हासीनमनंतभोगिनिप्रकृष्टविज्ञानबलैकधामनि फणामणिव्रातमयूखमंडलप्रकाशमा
नोदरदिव्यधामनि ४२ निवासशय्यासनपादुकांशुकोपधानवर्षातपवारणादिभिः श
रीरभेदैस्तवशेषतांगतैर्यथोचितंशेषइतीरितेजनैः ४३ दासःसखावाहनमासनंध्वजोय
स्तेवितानंव्यजनंत्रयीमयः उपस्थितंतेनपुरोगरुत्मतात्वदंघ्रिसंमर्दकिणांकशोभिना ४४
त्वदीयभुक्तोज्झितशेषभोजिनात्वयानिसृष्टात्मभरेणयद्यथा प्रियेणसेनापतिनानिवेदित
त्तथानुजानंतमुदारवीक्षणैः ४५ हताखिलक्लेशमलैस्स्वभावतःसदा नुकूल्यैकरसैस्त
वोचितैः गृहीततत्तत्परिचारसाधनैर्निषेव्यमाणंसचिवैर्यथोचितम् ४६ अपूर्वनानार

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

स्वभावनिर्भरप्रबुद्धयामुग्धविदग्धलीलया: क्षणाणुवत्क्षिप्तपरार्द्धकालया प्रहर्षयंतंमहिषींमहा
४ भुजम् ४७ अचिंत्यदिव्याद्भुतनित्ययौवनंस्वभावलावण्यमयामृतोदधिं श्रियः श्रियंभक्तजनै
कजीवितंसमर्थमापत्सखमर्थिकल्पकम् ४८ भवंतमेवानुचरन्निरंतरंप्रशांतनि:शेषमनोरथांतरः
कदाहमैकांतिकनित्यकिंकरःप्रहर्षयिष्यामिसनाथजीवितम् ४९ धिगशुचिमविनीतंनिर्दयंमाम
लज्जंपरमपुरुषयोहंयोगिवर्याग्रगण्यैः विधिशिवसनकाद्यैर्ध्यातुमत्यंतदूरंतवपरिजनभावंकाम
येकामवृत्तः ५० अपराधसहस्रभाजनंपतितंभीमभवार्णवोदरे अगतिंशरणागतंहरेकृपयाकेव
लमात्मसात्कुरु ५१ अविवेकघनांधदिङ्मुखेबहुधासंततदुःखवर्षिणि भगवन्भवदुर्दिनेपथः
स्खलितंमामवलोकयाच्युत: ५२ नमृषापरमार्थमेवमेशृणुविज्ञापनमेकमग्रतः यदिमेनदयिष्य
सेततोदयनीयस्तवनाथदुर्लभ: ५३ तदहंत्वदृतेननाथवान्मदृतेत्वंदयनीयवान्नच विधिनिर्मि
तमेतदन्वयंभगवन्पालयमास्मजीहपै: ५४ वपुरादिषुयोपिकोपिवागुणतोसानियथातथाविधः तदहं
तवपादपद्मयोरहमद्यैवमयासमर्पितः ५५ ममनाथयदस्तियोस्म्यहंसकलंतद्धितवैवमाधव
नियतस्वमितिप्रबुद्धधीरथवाकिंनुसमर्पयामिते ५६ अवबोधितवानिमांयथामयिनित्यांभवद ४

दीयतांस्वपम् कृपयैवमनन्यभोग्यतांभगवन्भक्तिमपिप्रयछमे ५७ तवदास्यसुखैकसंगिनांभवने
ष्वस्त्वपिकीटजन्ममे इतरावसथेषुमास्मभूदपिमेजन्मचतुर्मुखात्मना ५८ सकृत्वदाकारविलो
कनाशयात्टणीकृतानुत्तमभुक्तिमुक्तिभिः महात्मभिर्मामवलोक्यतांनयक्षणोपितेयद्विरहोतिदुः
सहः ५९ नदेहंनप्राणान्नचसुखमशेषाभिलषितंनचात्मानंनान्यत्किमपिशेषत्वविभवात्
वहिर्भूतंनाथक्षणमपिसहेयातुशतधाविनाशंतत्सत्यंमधुमथनविज्ञापनमिदम् ६० दुरंतस्या
नादेरपरिहरणीयस्यमहतोविहीनाचारोहंन्टपशुरशुभस्यास्पदमपि दयासिंधोवंधोन्निरवधिकवा
त्सल्यजलधेस्तवस्मारंस्मारंगुणगणमितीछामिगतभीः ६१ अनिछन्नप्येवंयदिपुनरपिछन्निव
र जस्तमछन्नछद्मस्तुतिवचनभंगीमरचयम् तथापीत्थंरूपंवचनमवलंव्यापिकृपयात्वमेवैवंभू
तंधरणिधरमेशिक्षयमनः ६२ पितात्वंमातात्वंदैततनयस्त्वंप्रियसुहृत्वमेवत्वंमित्रंगुरुरपिग
तिश्चासिजगताम् त्वदीयस्त्वभृत्यस्तवपरिजनस्त्वद्गतिरहंप्रपन्नश्चैवंसत्यहमपितवैवास्मिहि
भरः ६३ जनित्वाहंवंशेमहतिजगतिख्यातयशसांशुचीनांयुक्तानांगुणपुरुषतत्वस्थितिविदाम्
निसर्गादेवत्वच्चरणकमलैकांतमनसामधोधःपापात्माशरणदनिमज्जामितमसि ६४ अमर्या

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

दः सुदृक्ष्रल्लमन्तिरसूयाप्रंसवभूः कृतघ्नो दुर्मानी स्मरपरवशो वंचनपरः नृशंसः पापिष्ठः कथमहमितो दुः
खजलधेरपारादुत्तीर्णस्तव परिचरेयं चरणयो ६५ रघुवरयदभूस्त्वं तादृशो वायसस्य प्रणत इति दयालुर्य
५ स्य चैद्यस्य कृष्णः प्रतिभवमपराधुर्मुग्धसायुज्यदोभूर्वद किमपदमागस्तस्य तेस्ति क्षमायाः ६६ ननु प्रप
न्नः सकृदेवनाथ तवाहमस्मीति च याचमानः तवानुकंप्यः स्मरतः प्रतिज्ञां मदेकवर्जं किमिदं व्रतं ते ६७ अ
कृत्रिमत्वच्चरणारविंदप्रेमप्रकर्षावधिमात्मवंतम् पितामहं नाथमुनिं विलोक्य प्रसीद मद्वृत्तमचिंत
यित्वा ६८ यत्पादांभोरुहध्यानविध्वस्ताशेषकल्मषः वस्तुतामुपयातोहं यामुनेयं नमामितम् ६९ इ
ति श्रीयामुनाचार्यविरचितं आलवंदारस्तोत्रं संपूर्णं शुभमस्तु ॥ श्रीसीतारामाभ्यां नमः श्रीसीताराम


श्री सरस्वती पुस्तक भण्डार
श्री लक्ष्मण किला
अयोध्याजी

५

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur